# shrIdevasenAsahasranAmastotram

# શ્રીદેવસેનાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : devasenAsahasranAmastotram

File name : devasenAsahasranAmastotram.itx

Category : sahasranAma, subrahmanya, devii, devI

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Description-comments : skAnde shaNkarasaMhitAtaH. See corresopnding nAmAvalI

Latest update : June 30, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીદેવસેનાસહસ્રનામસ્તોત્રમ્

દકારાદિથકારાન્તવર્ણાદિનામાનિ

ૐ શ્રીગણેશાય નમઃ ।

બ્રહ્મોવાચ -
યા હિ પ્રકૃતિષષ્ઠાંશા મમ માનસપુત્રિકા ।
આયુઃ પ્રદા ચ જગતાં સુબ્રહ્મણ્યપ્રિયા સતી ॥ ૧॥

દેવસેનામ્બિકા તસ્યા નામસહસ્રમુત્તમમ્ ।
વદામિ નારદમુને પઠનાત્સર્વસિદ્ધિદમ્ ॥ ૨॥

અહમેવ મુનિસ્તસ્ય છન્દોઽનુષ્ટુબુદાહૃતઃ ।
દેવતા દેવસેનામ્બા સુબ્રહ્મણ્યપ્રિયા પરા ॥ ૩॥

બીજન્યાસાદિકં સર્વં માયાવર્ણૈઃ સમાચરેત્ ।
તતો ધ્યાયેદ્દેવસેનાં ગાઙ્ગેયસ્ય પ્રિયાં શુભામ્ ॥ ૪॥

ધ્યાનમ્ -
રક્તાભાં રક્તવસ્ત્રાં મણિમયખચિતાનેકભૂષાભિરામાં
    દેવીં માહેન્દ્રમાન્યાં મધુરિપુનયનાદુદ્ભવાં દેવસેનામ્ ।
કલ્હારં દક્ષહસ્તે તદિતરકરવરં લમ્બિતં સન્દધાનાં
    સંસ્થાં સ્કન્દસ્ય વામે સમુદમપિ ગુહં લોકયન્તીં ભજેઽહમ્ ॥

એવં ધ્યાત્વા સમભ્યર્ચ્ય મનસા સાદરં નરઃ ।
પઠેન્નામસહસ્રં તત્સ્તવરાજમનુત્તમમ્ ।
ૐ દેવસેના દેવરાજતનયા દેવવન્દિતા ।
દેવી દેવીશ્વરી દેવવનિતા દેવતાર્ચિતા ॥ ૧॥

દેવરા દેવરારાધ્યા દેવમાનસહંસિકા ।
દેવદારુવનાન્તઃ સ્થા દેવતા દેવમોહિની ॥ ૨॥

દેવારિવિમુખા દેવમુનીડ્યા દેવદેશિકા ।
દૈત્યારિતનયા દૈત્યકણ્ટકી દૈત્યમર્દિની ॥ ૩॥

દૈવ્યા દૈન્યપરાધીના દૈવજ્ઞા દૈવ્યભક્ષિણી ।
દોર્દ્વયા દોષહીનાઙ્ગી દોષાભા દોર્ધૃતામ્બુજા ॥ ૪॥

દોષાકરસમાનાસ્યા દોષાકરસમર્ચિતા ।
દોષઘ્ની દોર્લતા દોલચેલા દોલવિહારિણી ॥ ૫॥

દણ્ડિણી દણ્ડનીતિસ્થા દણ્ડાયુધપતિવ્રતા ।
દણ્ડકારણ્યનિલયા દણ્ડિતાસુરવિક્રમા ॥ ૬॥

દક્ષા દાક્ષાયણીપ્રતા દક્ષિણા દક્ષિણાશ્રિતા ।
દક્ષજ્ઞા દક્ષિણાવર્તકમ્બુકણ્ઠી દયાનિધિઃ ॥ ૭॥

દયામૂર્તિર્દરીદૃશ્યા દારીદ્ર્યભયનાશિની ।
દશસ્યન્દનસમ્પૂજ્યા દશનાજિતચન્દ્રિકા ॥ ૮॥

દમ્ભા દમ્ભવિહીનેડ્યા દન્તિવક્ત્રાનુજપ્રિયા ।
દાત્રી દાનવદર્પઘ્ની દામોદરમનોહરા ॥ ૯॥

દિવ્યા દિવિષદીશાના દિવિષત્પતિપૂજિતા ।
દિવ્યૌઘમણ્ડલા દિવ્યમાલિની દિવ્યવિગ્રહા ॥ ૧૦॥

દિવ્યામ્બરધરા દીનરક્ષિકા દીનકૃન્નુતા ।
દીક્ષિતા દીક્ષિતારાધ્યા દીપ્તા દીપ્તવિભૂષણા ॥ ૧૧॥

દુષ્ટદૂરા દુરારાધ્યા દુઃખઘ્ની દુરિતાન્તકી ।
દૂતી દૂતકુલાભીષ્ટા દૂર્વાસસ્તુતવૈભવા ॥ ૧૨॥

દૂરદૂરા દૂરગન્ત્રી દૂર્વાદલસમપ્રભા ।
દૃશ્યા દૃગ્જલસમ્ભૂતા દૃક્પ્રદા દૃક્તમોપહા ॥ ૧૩॥

દ્રાવિણી દ્રાવિડાધીશા દ્રોણપૂજ્યા દ્રુમાશ્રિતા ।
ધન્દા ધર્મિણી ધર્મવિનુતા દર્મવર્ધિની ॥ ૧૪॥

ધાત્રી ધાત્રીફલપ્રીતા ધિષણાધિપપૂજિતા ।
ધિષણેશી ધીરનુતા ધીરવાદવિલાસિની ॥ ૧૫॥

ધૂમ્રકેશી ધૂપમોદા ધૂર્તઘ્ની ધૃતિમત્પ્રિયા ।
ધ્યેયા ધ્યેયાતિગા ધૌમ્યવસના ધૌમ્યપૂજિતા ॥ ૧૬॥

નમ્યા નગોદ્ભવાસૂનુપ્રિયા નારાયણાત્મજા ।
નારાયણાક્ષિજલજા નારાયણગુરુર્નતા ॥ ૧૭॥

નટી નટેશ્વરાનન્દા નન્દિની નન્દગોપમુત્ ।
નિત્યા નિત્યાશ્રિતા નિત્યપતિર્નિત્યપતિવ્રતા ॥ ૧૮॥

નિરઞ્જના નિરાકારા નિર્વિકારા નિરર્ગલા ।
નીહારાદ્રિકૃતાવાશા નીહારાદ્રિસુતાસ્નુષા ॥ ૧૯॥

નીપ્યા નીપસુમપ્રિતા નૂપુરારાવકોમલા ।
નૂત્ના નૂતનભૂષાઢ્યા ન્યૂનહીના નરેડિતા ॥ ૨૦॥

નૌકારૂઢા નવરસા નવવાદિત્રમેદુરા ।
નવવીરસમારધ્યા નવનાગવરેશ્વરી ॥ ૨૧॥

નવગ્રહવરા નવ્યા નવ્યામ્ભોજધરા નિશા ।
પદ્માક્ષી પદ્મસઙ્કાશા પદ્મજા પદ્મભાસુરા ॥ ૨૨॥

પરાચલકૃતોદ્વાહા પરાચલવિહારિણી ।
પદ્મનાભસુતા પદ્મા પદ્મિની પદ્મમાલિની ॥ ૨૩॥

પારિજાતસુમપ્રીતા પાશઘ્ની પાપનાશિની ।
પાઠીનવાહસમ્પૂજ્યા પાર્વતીસુતકામિની ॥ ૨૪॥

પીનસ્તની પીનપૃષ્ઠા પુષ્પકોમલા ।
પુષ્કરા પુષ્કરારાધ્યા પુષ્કરક્ષેત્રદેવતા ॥ ૨૫॥

પુલિન્દિનીસપત્ની ચ પુરુહૂતાત્મસમ્ભવા ।
પૂજ્યા પૂતા પૂતનારિવિનુતા પૂર્વગામિની ॥ ૨૬॥

પુષ્ટેન્દુનયના પૂર્ણા પેશલા પેશલાસના ।
ફણાધરમણિપ્રખ્યા ફણિરાજસુપૂજિતા ॥ ૨૭॥

ફુલ્લપદ્મધરા ફુલ્લદૃષ્ટિઃ ફલનગાશ્રિતા ।
ભાલનેત્રસુતાનન્દા ભાલનેત્રપ્રિયઙ્કરી ॥ ૨૮॥

બલા બલારિજા બાલા બાલારિષ્ટવિનાશિની ।
બાલખિલ્યનુતા બાણાહસ્તા બાણાસુરાન્તકી ॥ ૨૯॥

બિમ્બાધરા બિન્દુમધ્યસ્થિતા બુધવરાર્ચિતા ।

બોધાયનમુનિપ્રીતા બોધદા બોધરૂપિણી ॥ ૩૦॥

બન્ધુકકુસુમપ્રીતા બન્ધૂકસુમસન્નિભા ।
ભામિની ભારતી ભામા ભાસ્કરેન્દુસુપૂજિતા ॥ ૩૧॥

ભીમા ભીમેશ્વરી ભૂમા ભૂતિદા ભૂપતિપ્રિયા ।
ભુવનેશી ભોગવતિ ભોગદા ભોગવર્ધિની ॥ ૩૨॥

ભોગિરાજનુતા ભોગ્યા ભીમસેનસમર્ચિતા ।
ભૈમી ભેતાલનટનરસિકા ભીષ્મસેવિતા ॥ ૩૩॥

મન્ત્રિણી મન્ત્રસારજ્ઞા મન્ત્રવર્ણાકૃતિર્મતિઃ ।
મનુચક્રધરા માન્યા મણિમાલવિભૂષિતા ॥ ૩૪॥

માનિની માધવસુતા મધુપ્રીતા મનસ્વિની ।
મધુરાલાપમુદિતગિરિજાતનુજા મહી ॥ ૩૫॥

માતૃકાવર્ણ સઙ્કૢપ્તતનુર્માન્ધાતૃપૂજિતા ।
મહાદેવસ્નુષા મીનલોચના મુક્તિદાયિની ॥ ૩૬॥

મઞ્જુકેશી મઞ્જુહાસા મયૂરવરવાહના ।
મારારાતિસ્નુષા મારસુરવદા મણિમણ્ડના ॥ ૩૭॥

મેષવાહા મેઘવાહતનુજા મોહિતપ્રિયા ।
મરુત્સપ્તકસંસેવ્યા મૈનાકનિલયાશ્રિતા ॥ ૩૮॥

યક્ષિણી યજ્ઞસમ્ભૂતા યામિની યમલોદ્ભવા ।
યન્ત્રેશ્વરી યમારાધ્યા યાયજૂકસમર્ચિતા ॥ ૩૯॥

યાનારૂઢા યજ્ઞશીલા યુવતિર્યૌવનાર્ચિતા ।
યોગિની યોગદા યોગ્યા યોગીન્દ્રકુલવન્દિતા ॥ ૪૦॥

રક્ષોહન્ત્રી રણત્પાદનૂપુરા રાઘવાર્ચિતા ।
રેણુકા રણસન્નાહા રણત્કિઙ્કિણિમેખલા ॥ ૪૧॥

રાવણાન્તકરી રાજ્ઞી રાજરાજસમર્ચિતા ।
રીમ્બીજા રૂપિણી રૂપ્યા રમણી રમણોત્સુકા ॥ ૪૨॥

રસાયનકરી રાધા રાધેયી રથસંસ્થિતા ।
રોહિણીશમુખા રોગહીના રોગવિનાશિની ॥ ૪૩॥

રોચનાતિલકા રૌદ્રી રૌદ્રમન્ત્રવિશારદા ।
લક્ષ્મીપતિસુતા લક્ષ્મીર્લમ્બવામકરામ્બુજા ॥ ૪૪॥

લમ્પટા લકુલી લીલા લોકાલોકવિહારિણી ।
લોકેશ્વરી લોકપૂજ્યા લતાકારા લલત્કચા ॥ ૪૫॥

લોલમ્બચેલા લોલક્ષી લઘિમા લિકુચપ્રિયા ।
લોભહીના લબ્ધકામા લતાનિલયસંસ્થિતા ॥ ૪૬॥

વનિતા વનિતારધ્યા વન્દ્યા વન્દાસુવત્સલા ।
વામા વામસ્થિતા વાણી વાક્પ્રદા વારિજપ્રિયા ॥ ૪૭॥

વારિજાસનસન્દૃષ્ટમન્ત્રા વાઞ્છાસુરદ્રુમા ।
વિષ્ણુપત્ની વિષહરા વીણાલાપવિનોદિની ॥ ૪૮॥

વેણીબન્ધા વણુલોલા વેણુગોપાલસુન્દરી ।
વાઞ્છાકલ્પલતા વિશ્વવન્દિતા વિશ્વતોમુખી ॥ ૪૯॥

વિઘ્નેશદેવરા વીશા વીશવાહા વિરોચિની ।
વૈરોચનનુતા વૈરિહીના વીરેન્દ્રવન્દિતા ॥ ૫૦॥

વિમાના વિમનોદૂરા વિમાનસ્થા વિરટ્ પ્રિયા ।
વજ્રિણી વજ્રિતનયા વજ્રભૂષા વિધીડિતા ॥ ૫૧॥

વિશાલાક્ષી વીતશોકા વનસ્થા વનદેવતા ।
વારુણી વનજારૂઢા વામા વામાઙ્ગસુન્દરી ॥ ૫૨॥

વલ્લીસપત્ની વામોરુર્વસિષ્ઠાદિમપૂજિતા ।
શક્તિઃ શચીસુતા શક્તિધરા શાક્તેયકામિની ॥ ૫૩॥

શ્યામા શાક્કરગા શ્રીજા તથા શ્રીઃ શિવમાનસા ।
શિવસ્નુષા શુભાકારા શુદ્ધા શૈલવિહારિણી ॥ ૫૪॥

શૈલેન્દ્રજાજાનિજેષ્ટપ્રદા શૈલાદિસન્નુતા ।
શામ્ભવી શઙ્કરાનન્દા શઙ્કરી શશિશેખરા ॥ ૫૫॥

શારદા શારદારાધ્યા શરજન્મસતી શિવા ।
ષષ્ઠી ષષ્ઠીશ્વરી ષષ્ઠિદેવી ષષ્ઠયધિદેવતા ॥ ૫૬॥

ષડાનનપ્રીતિકર્ત્રી ષડ્ગુણા ષણ્મુખપ્રિયા ।
ષડાધારૈકનિલયા ષોઢાન્યાસમયાકૃતિઃ ॥ ૫૭॥

ષડ્વિધૈક્યાનુસન્ધાનપ્રીતા ષડ્રસમિશ્રિતા ।
સામ્રાજ્ઞી સકલા સાધ્વી સમનીસ્થાનગા સતી ॥ ૫૮॥

સઙ્ગીતરસિકા સારા સર્વાકરા સનાતના ।
સનાતનપ્રિયા સત્યા સત્યધર્મા સરસ્વતી ॥ ૫૯॥

સહસ્રનામસમ્પૂજ્યા સહસ્રાંશુસમપ્રભા ।
સ્કન્દોત્સાહકરી સ્કન્દવામોત્સઙ્ગનિવાસિની ॥ ૬૦॥

સિંહવક્ત્રાન્તકકરી સિંહારૂઢા સ્મિતાનના ।
સ્વર્ગસ્થા સુરસમ્પૂજ્યા સુન્દરી સુદતી સુરા ॥ ૬૧॥

સુરેશ્વરી સુરાચાર્યપૂજિતા સુકૃતીડિતા ।
સુરદ્રુનિલયા સૌરમણ્ડલસ્થા સુખપ્રદા ॥ ૬૨॥

સૌદામિનીનિભાસુભ્રૂઃ સૌન્દર્યચિતહૃત્પ્રિયા ।
સુરદ્રુહાસુહૃત્સોમયાજિપૂજ્યા સુમાર્ચિતા ॥ ૬૩॥

સુમેષુવરદા સૌમ્યા સ્કન્દાન્તઃપુરવાસિની ।
સ્કન્દકોષ્ઠગતા સ્કન્દવામભાગસ્થિતા સમા ॥ ૬૪॥

સ્કન્દાશ્લિષ્ટા સ્કન્દદૃષ્ટિઃ સ્કન્દાયત્તમનસ્વિની ।
સનકાદિહિતા સાઙ્ગા સાયુધા સુરવંશજા ॥ ૬૫॥

સુરવલ્લી સુરલતા સુરલોકનિવાસિની ।
સુબ્રહ્મણ્યસખી સેના સોમવંશ્યનૃપેડિતા ॥ ૬૬॥

સુતપ્રદા સૂતવાયુઃ સુરસૈન્યસુરક્ષિકા ।
સર્વાધારા સર્વભૂષા સર્વેશી સર્વપૂજિતા ॥ ૬૭॥

સરસા સાદરા સામા સ્વામિની સ્વામિમોહિની ।
સ્વામ્યદ્રિનિલયા સ્વચ્છા સ્વતન્ત્રા સ્વસ્તિદા સ્વધા ॥ ૬૮॥

સ્વાહાકૃતિઃ સ્વાદુશીલા સ્વરપ્રસ્તારવિત્તમા ।
હરસ્નુષા હરાનન્દા હરિનેત્રસમુદ્ભવા ॥ ૬૯॥

હરિણાક્ષી હરિપ્રેમા હરિદશ્વવિવર્ધિતા ।
હરસૂનુપ્રિયા હરભાસુરા હીરભૂષણા ॥ ૭૦॥

હેમામ્બુજધરા હેમકાઞ્ચી હેમાબ્જસંસ્થિતા ।

હેમાદ્રિનિલયા હેલામુદિતાસ્વપ્રકામિની ॥ ૭૧॥

હેરમ્બદેવરા હોમપ્રિયા હોત્રી હિરણ્યદા ।
હિરણ્યગર્ભોપજ્ઞાતમન્ત્રા હાનિવિવર્જિતા ॥ ૭૨॥

હિમાચલસ્થિતા હન્ત્રી હર્યક્ષાસનસંસ્થિતા ।
હંસવાહા હંસગતિર્હંસી હંસમનુપ્રિયા ॥ ૭૩॥

હસ્તપદ્મા હસ્તયુગા હસિતા હસિતાનના ।
હૃદ્યા હૃન્મોહસંહર્ત્રી હૃદયસ્થા હતાસુરા ॥ ૭૪॥

હાકિની હાકિનીપૂજ્યા હિતા હિતકરી હરા ।
હરિદ્રામુદિતા હર્મ્યસંસ્થા હલધરેડિતા ॥ ૭૫॥

હાલાહલપ્રશમની હલાકૃષ્ટજગત્ત્રયા ।
હલ્લીસમુદિતા હેયવર્જિતા હરકોમલા ॥ ૭૬॥

ક્ષમા ક્ષમાકરી ક્ષામમધ્યા ક્ષામવિનાશિની ।
ક્ષામાદિવિનુતા ક્ષિપ્રા ક્ષણિકાચલસંસ્થિતા ॥ ૭૭॥

ક્ષપેશતુલ્યવદના ક્ષપાચરવિનાશિની ।
ક્ષિપ્રસિદ્ધિપ્રદા ક્ષેમકારિણી ક્ષેત્રરૂપિણી ॥ ૭૮॥

ક્ષેત્રેશ્વરી ક્ષેત્રપાલપૂજિતા ક્ષુદ્રનાશિની ।
ક્ષુદ્રગ્રહાર્તિશમની ક્ષૌદ્રા ક્ષોદ્રામ્બરાવૃતા ॥ ૭૯॥

ક્ષીરાન્નરસિકા ક્ષીરા ક્ષુદ્રઘણ્ટા ક્ષિતીશ્વરી ।
ક્ષિતીશવિનુતા ક્ષત્રા ક્ષત્રમણ્ડલવન્દિતા ॥ ૮૦॥

ક્ષયહીના ક્ષયવ્યાધિનાશિની ક્ષમણાપહા ।
ક્ષરાક્ષરા ક્ષતારાતિમણ્ડલા ક્ષિપ્રગામિની ॥ ૮૧॥

ક્ષણદા ક્ષણદારાધ્યા ક્ષણદાકુટિલાલકા ।
ક્ષીણદોષા ક્ષિતિરુહા ક્ષિતિતત્ત્વા ક્ષમામયી ॥ ૮૨॥

અમરા ચામરાધીશતનયા ચાપરાજિતા ।
અપારકરુણાઽદ્વૈતા અન્નદાઽન્નેશ્વરી અજા ॥ ૮૩॥

અજારૂઢા અજારધ્યા અર્જુનારાધિતાઽજરા ।
અરિષ્ટસમની ચાચ્છા અદ્ભુતા અમૃતેશ્વરી ॥ ૮૪॥

અમૃતાબ્ધિકૃતાવાસા અમૃતાસારશીતલા ।
અમૃતાનન્દિતાઽનાદિરમૃતા અમૃતોદ્ભવા ॥ ૮૫॥

અનાદિમધ્યા અવધિઃ અનૌપમ્યગુણાશ્રિતા ।
આધારહીના ચાધારા આધારાધેયવર્જિતા ॥ ૮૬॥

આદિત્યમણ્ડલાન્તસ્થા આશ્રિતાખિલસિદ્ધિદા ।
આસુમોહિતષડ્વક્ત્રા આશાપાલસુપૂજિતા ॥ ૮૭॥

આરગ્વધપ્રિયાઽઽરાર્તિમુદિતાઽઽચરશાલિની ।
આયુઃ પ્રદાઽઽરોગ્યકર્ત્રી આરધ્યાઽઽહારભક્ષિણી ॥ ૮૮॥

ઇન્દ્રસેના ઇન્દ્રનુતા ઇન્દ્રાવરજસમ્ભવા ।
ઇન્દિરારમણપ્રીતા ઇન્દ્રાણીકૃતલાલના ॥ ૮૯॥

ઇન્દીવરાક્ષી ઇન્દ્રક્ષી ઇરમ્મદસમપ્રભા ।
ઇતિહાસશ્રુતકથા ઇષ્ટા ચેષ્ટાર્થદાયિની ॥ ૯૦॥

ઇક્ષ્વાકુવંશ્યસમ્પૂજ્યા ઇજ્યાશીલવરપ્રદા ।
ઈશ્વરી ચેશાતનયગૃહિણી ચેશ્વરપ્રિયા ॥ ૯૧॥

ઈતિબાધાહરા ચેડ્યા ઈષણારહિતાશ્રિતા ।
ઉમાસુતપ્રિયા ચોદ્યદ્રવિતુલ્યા ઉમાપ્રિયા ॥ ૯૨॥

ઉદારા ચોદ્યમા ચોદ્યત્કિરણા ઉરુવિક્રમા ।
ઉરુપ્રભાવા ચોર્વીભૃન્નિલયા ચોડુગણાશ્રિતા ॥ ૯૩॥

ઊરુન્યસ્તકરા ચોર્ધ્વલોકસ્થા ઊર્ધ્વગામિની ।
ઋદ્ધિદા ઋદ્ધવિનુતા ઋણહન્ત્રી ઋજુપ્રિયા ॥ ૯૪॥

એણાઙ્કશેખરસુતગાઢાશ્લિષ્ટવપુર્ધરા ।
એણાક્ષી ચૈણમુદિતા ઐરમ્મદસમામ્બરા ॥ ૯૫॥

ઓષધિપ્રસ્થનિલયા ઓષધીશાનસેવિતા ।
ઓમીશ્વરી ઔપલામ્બા ઔત્સુક્યવરદાયિની ॥ ૯૬॥

ઔદાર્યશીલા ચામ્બોત્કિમુદિતાઽઽપન્નિવરિણી ।
કઞ્જાક્ષી કઞ્જવિનુતા કમ્બુકણ્ઠી કવિપ્રિયા ॥ ૯૭॥

કમલા કમલારાધ્યા કનત્કનકવિગ્રિહા ।
કામિની કામવિનુતા કામારાતિયુતપ્રિયા ॥ ૯૮॥

કામાઙ્ગનેડિતા કામ્યા કામલોલા કલાવતી ।
કાઙ્ક્ષાહીના કામકલા કિંશુકાભરદચ્છદા ॥ ૯૯॥

કલા કુવમયાનન્દા કુરુવિન્દમણિપ્રભા ।
કુક્કુટધ્વાનમુદિતા કુક્કુટધ્વજકોમલા ॥ ૧૦૦॥

કૂર્માસનગતા કૂર્મપૃષ્ઠાભપ્રપદાન્વિતા ।
કૃત્તિકાતનયપ્રીતા કૃત્તિકામણ્ડલાવૃતા ॥ ૧૦૧॥

કૃત્તિકાભપ્રિયા કૃત્તિધરા કેદારવાસિની ।
કેવલા કેવલાનન્દા કેકિમોદા કરદ્વયા ॥ ૧૦૨॥

કેકિવાહા કેશવેષ્ટા કૈલાસાચલવાસિની ।
કૈવલ્યદાત્રી કૈવલ્યા કોમલા કોમલાકૃતિઃ ॥ ૧૦૩॥

કોણસ્થા કોપવિમુખા કૌણ્ડિન્યમુનિપૂજિતા ।
કૃપાપૂર્ણા કૃપાલોકા કૃપાચાર્યસમર્ચિતા ॥ ૧૦૪॥

કૃતાન્તાભયદા કૃષ્ણનુતા કૃષ્ણાજિનાસના ।
કલિહન્ત્રી કલીશાની કલિકલ્મષનાશિની ॥ ૧૦૫॥

કવેરતનયાતીરવાસિની કમલાસના ।
ખડ્ગહસ્તા ખાદ્યલોલા ખણ્ડિતારાતિમણ્ડલા ॥ ૧૦૬॥

ગણ્યા ગણપ્રિયા ગદ્યાપદ્યા ગણનવર્જિતા ।
ગણેશાવરજપ્રેમા ગણિકામણ્ડલોત્સુકા ॥ ૧૦૭॥

ગણેશારાધનોદ્યુક્તા ગાયત્રી ગાનલોલુપા ।
ગાથાનેકા ગાલવાર્ચ્યા ગાઙ્ગેયસુમનોહરા ॥ ૧૦૮॥

ગાઙ્ગેયાલિઙ્ગિત તનુઃ ગાઙ્ગેયપરમોત્સુકા ।
ગિરિગમ્યા ગિરિનુતા ગિરીશા ગિરિશસ્નુષા ॥ ૧૦૯॥

ગિરિજાજાનિજજયા ગિરિસૌધા ગિરિસ્થિતા ।
ગીર્વાણવિનુતા ગીતા ગીતગન્ધર્વમણ્ડલા ॥ ૧૧૦॥

ગીર્વાણેશતપોલબ્ધા ગીર્વાણી ગીષ્પતીડિતા ।
ગુહ્યા ગુહ્યતમા ગુણ્યા ગુહ્યકાદિસમાર્ચિતા ॥ ૧૧૧॥

ગુરુપ્રિયા ગૂઢગતિર્ગુહાનન્દા ગુહપ્રિયા ।

ગુહેષ્ટા ગુહસમ્મોહા ગુહાનન્યા ગુહોત્સુકા ॥ ૧૧૨॥

ગુહશ્રીર્ગુહસારજ્ઞા ગુહાશ્લિષ્ટકલોવરા ।
ગૂઢા ગૂઢતમા ગૂઢવિદ્યા ગોવિન્દસમ્ભવા ॥ ૧૧૩॥

ગોવિન્દસહજાસૂનુકલત્રં ગોપિકાનુતા ।
ગોપાલસુન્દરી ગોપનુતા ગોકુલનાયિકા ॥ ૧૧૪॥

ગોત્રભિત્તનયા ગોત્રા ગોત્રજ્ઞા ગોપતિસ્થિતા ।
ગૌરવી ગૌરવર્ણાઙ્ગી ગૌરી ગૌર્યર્ચનપ્રિયા ॥ ૧૧૫॥

ગણ્ડકીતીરગા ગણ્ડભેરુણ્ડા ગણ્ડભૈરવી ।
ગણ્ડમાલા ગણ્ડભૂષા ગણ્ડમાઙ્ગલ્યભૂષણા ॥ ૧૧૬॥

ઘટાર્ગલા ઘટરવા ઘટતુલ્યસ્તનદ્વયા ।
ઘટનારહિતા ઘણ્ટામણિર્ઘણ્ટારવપ્રિયા ॥ ૧૧૭॥

ઘટિકા ઘટિકાશૂન્યા ઘૃણાપૂર્ણા ઘૃણિપ્રિયા ।
ઘટોદ્ભવમુનિસ્તુત્યા ઘુટિકાસિદ્ધિદાયિની ॥ ૧૧૮॥

ઘૂર્ણાક્ષી ઘૃતકાઠિન્યા ઘૃતસૂક્તાનુવાદિતા ।
ઘૃતાહુતિપ્રિયા ઘૃષ્ટિર્ઘૃષ્ટકર્ત્રી ઘૃણાનિધિઃ ॥ ૧૧૯॥

ઘોરકૃત્યા ઘોરકૃત્યવિમુખા ઘનમૂર્ધજા ।
ચઞ્ચલા ચપલા ચણ્ડા ચદુલા ચદુલેક્ષણા ॥ ૧૨૦॥

ચણ્ડપ્રચણ્ડા ચણ્ડીશા ચરચરવિનોદિની ।
ચતુરા ચતુરશ્રાઙ્ગુચક્રા ચક્રધરાત્મજા ॥ ૧૨૧॥

ચક્રિણી ચક્ર કબરી ચક્રવર્તિસમર્ચિતા ।
ચન્દ્રકાશા ચન્દ્રમુખી ચન્દ્રહાસા ચમત્કૃતા ॥ ૧૨૨॥

ચન્દ્રહાસધરા ચક્રવાકસ્તનભુજાન્તરા ।
ચક્રવાલસ્થિતા ચક્રગતિશ્ચન્દનચર્ચિતા ॥ ૧૨૩॥

ચારુભૂષા ચારુમુખી ચારુકાન્તિશ્ચરુપ્રિયા ।
ચાર્વાકદૂરગા ચપધરા ચામ્પેયગન્ધિની ॥ ૧૨૪॥

ચિત્રા ચિત્રરથા ચિન્ત્યા ચિરન્તના ।
ચીનામ્બરા ચીનદેશ્યા ચિદમ્બરવિહારિણી ॥ ૧૨૫॥

ચિકુરા ચિકુરાબદ્ધા ચિરઞ્જીવિત્વદાયિની ।
ચિન્તિતાર્થપ્રદા ચિન્તનીયા ચિન્તામણીશ્વરી ॥ ૧૨૬॥

ચિન્તામણિમયાકલ્પા ચિન્મયી ચિન્તિતા ચિતિઃ ।
ચ્યુતિહીના ચૂતકુઞ્જા ચોરઘ્ની ચોરનાશિની ॥ ૧૨૭॥

ચતુરાનનસમ્પૂજ્યા ચામરગ્રાહિણીવૃતા ।
ચક્ષુષ્મતી ચક્ષૂરોગ હારિણી ચણકપ્રિયા ॥ ૧૨૮॥

ચણ્ડીસૂનુમનઃ પ્રીતિકારિણી ચૂર્ણકુન્તલા ।
ચૂર્ણપ્રિયા ચલચ્ચેલા ચારુક્કણિતકઙ્કણા ॥ ૧૨૯॥

ચામીકરપ્રભા ચામીકરભૈરવમોહિની ।
ચામીકરાદ્રિનિલયા ચાતુર્યોક્તિજિતપ્રિયા ॥ ૧૩૦॥

ચત્વરા ચત્વરગતિશ્ચતુર્વિધપુમર્થદા ।
છત્રિણી છત્રવીરેન્દ્રા છવિદીપ્તદિગન્તરા ॥ ૧૩૧॥

છાયાહીના છવિચ્છ (ચ્છિ) ન્ના છવિકર્ત્રી છવીસ્વરી ।
છાદિતારાતિનિવહા છાયાપતિમુખાર્ચિતા ॥ ૧૩૨॥

છેત્રી છેદિતદિઙ્નાગા છેદહીનપદસ્થિતા ।
જયા જયકરી જન્યા જનિહીના જનાર્ચિતા ॥ ૧૩૩॥

જયન્તસહજા જમ્ભભેદિગોત્રસમુદ્ભવા ।
જહ્નુકન્યાસુતપ્રેમા જહ્નુજાતીરવાસિની ॥ ૧૩૪॥

જટાધરસુતાનન્દા જટાહીના જદાત્રયા ।
જરામરણનિર્મુક્તા જગદાનન્દદાયિની ॥ ૧૩૫॥

જનાર્દનસુતા જન્યહીના જલધરાસના ।
જલાધારા જપપરા જપાપુષ્પસમાકૃતિઃ ॥ ૧૩૬॥

જાહ્નવીપુલિનોત્સાહા જાહ્નવીતોયમોદિની ।
જાનકીરમણપ્રીતા જાતકર્મવિશારદા ॥ ૧૩૭॥

જાતકાભીષ્ટદા જાતિહીના જાત્યન્ધમોચિની ।
જિતાખિલોન્દ્રિયગ્રામા જિતારિર્જિતકામિની ॥ ૧૩૮॥

જિતામિત્રા જિતજગત્ જિનદૂરા જિનાર્ચિતા ।
જીર્ણા જીરકનાસાગ્રા જીવના જીવનપ્રદા ॥ ૧૩૯॥

જીવલોકેષ્ટવરદા જીવા જીવા(વ) રસપ્રિયા ।
જુષ્ટા જુષ્ટપ્રિયા જુષ્ટહૃદયા જ્વરનાશિની ॥ ૧૪૦॥

જ્વલત્પ્રભાવતી જ્યોત્સ્ના જ્યોત્સ્નામણ્ડલમધ્યગા ।
જયદા જનજાડ્યાપહારિણી જન્તુતાપહા ॥ ૧૪૧॥

જગદ્ધિતા જગત્પૂજ્યા જગજ્જીવા જનાશ્રિતા ।
જલજસ્થા જલોત્પન્ના જલજાભવિલોચના ॥ ૧૪૨॥

જપાધરા જયાનન્દા જમ્ભભિદ્વનિતાનુતા ।
ઝલ્લરીવાદ્યસુપ્રીતા ઝઞ્ઝાવાતાદિભીતિહા ॥ ૧૪૩॥

ઝર્ઝરીકૃતદૈત્યૌઘા ઝારિતાશેષપાતકા ।
જ્ઞાનેશ્વરી જ્ઞાનદાત્રી જ્ઞાતલોકાન્તરસ્થિતિઃ ॥ ૧૪૪॥

જ્ઞાનગમ્યા જ્ઞાતતત્વા જ્ઞાનજ્ઞેયાદિશૂન્યગા ।
જ્ઞેયા જ્ઞાતિવિનિર્મુક્તા જ્ઞાતકાન્તાન્તરાશયા ॥ ૧૪૫॥

ટઙ્કાયુધધરા ટઙ્કદમ્ભોલિહતદાનવા ।
ટઙ્કિતાખિલપાપૌઘા ટીકાકર્ત્રી ઠમાત્મિકા ॥ ૧૪૬॥

ઠમણ્ડલા ઠક્કુરાર્ચ્યા ઠક્કુરોપાધિનાશિની ।
ડમ્ભહીના ડામરીડ્યા ડિમ્ભદા ડમરુપ્રિયા ॥ ૧૪૭॥

ડાકિની ડાકિનીસેવ્યા ડિત્થેશી ડિણ્ડિમપ્રિયા ।
ડિણ્ડિમારાવમુદિતા ડબિત્થમૃગવાહના ॥ ૧૪૮॥

ડઙ્ગારી ડુણ્ડુમારાવા ડલ્લકી ડોરસૂત્રભૃત્ ।
ઢક્કાવદ્યધરા ઢક્કારાવનિશ્ચયૂતદિક્તટા ॥ ૧૪૯॥

ઢુણ્ઢિરાજાનુજપ્રીતા ઢુણ્ઢિવિઘ્નેશદેવરા ।
ઢોલાકેલિકરા ઢોલાવિહારોત્સૃષ્ટકન્દુકા ॥ ૧૫૦॥

ણકારબિન્દુવામસ્થા ણકારજ્ઞાનિર્ણયા ।
ણકારજલજોદ્ભૂતા ણકારસ્વરવાદિની ॥ ૧૫૧॥

તન્વી તનુલતાભોગા તનુશ્યામા તમાલભા ।
તરુણી તરુણાદિત્યવર્ણા તત્ત્વાતિશાયિની ॥ ૧૫૨॥

તપોલભ્યા તપોલોકપૂજ્યા તન્ત્રીવિદૂષિણી ।

તાત્પર્યાવધિકા તારા તારકાન્તકકામિની ॥ ૧૫૩॥

તારેશી તારિણી તિર્યક્સૂત્રિણી ત્રિદશાધિપા ।
ત્રિદશાધિપસમ્પૂજ્યા ત્રિનેત્રા ત્રિવિધા ત્રયી ॥ ૧૫૪॥

તિલ્વાટવીગતા તુલ્યહીના તુમ્બુરુવન્દિતા ।
તુરાષાટ્સમ્ભવા તુર્યા તુષારાચલવાસિની ॥ ૧૫૫॥

તુષ્ટા તુષ્ટિપ્રદા તુર્ણા તૂર્ણધ્વસ્તાખિલામયા ।
ત્રેતા ત્રેતાગ્નિમધ્યસ્થા ત્રય્યન્તોદ્ગીતવૈભવા ॥ ૧૫૬॥

તોત્રભૃદ્વીરસંસેવ્યા સ્થિતિઃ સ(તિસ)ર્ગાદિકારિણી ।
સર્વાર્થદાત્રી પ્રકૃતિષષ્ઠાંશા પરમેશ્વરી ॥ ૧૫૭॥

વસ્વાદિગણસમ્પૂજ્યા બ્રહ્મમાનસપુત્રિકા ।
સરિરાન્તર્ભ્રાજમાના સ્વર્ણરમ્ભગ્રહાર્ચિતા ॥ ૧૫૮॥

બ્રહ્મજ્યોતિર્બ્રહ્મપત્ની વિદ્યા શ્રીઃ પરદેવતા । Oમ્ ।
એવં નમસહસ્રં તે દેવસેનાપ્રિયઙ્કરમ્ ॥ ૧૫૯॥

પુત્રપ્રદમપુત્રાણાં આયુરારોગ્યવર્ધનમ્ ।
બાલારિષ્ટપ્રસમનં સર્વસૌખ્યપ્રદાયકમ્ ॥ ૧૬૦॥

શુક્રવારે ભૌમવારે ષષ્ઠ્યાં વા કૃત્તિકાસ્વપિ ।
આવર્તયોદ્વિશેષેણ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૬૧॥

યો હિ નિત્યં પઠેદ્ધીમાન્ સર્વાઃ સિદ્ધ્યન્તિ સિદ્ધયઃ ।
અનેનાભ્યર્ચયેદ્દેવીં બિલ્વૈર્વા કુઙ્કુમાદિભિઃ ।
સર્વાન્કામાનવાપ્યાન્તે સ્કન્દસાયુજ્યમાપ્નુયાત્ ॥ ૧૬૨॥

ઇતિ શ્રીમદ્સ્કાન્દે શઙ્કરસંહિતાતઃ
શ્રીદેવસેનાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com

*shrIdevasenAsahasranAmastotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*